अध्यायः 10

# वणिजः राजानः तीर्थयात्रिणः च

## विपण्यां भ्रमन्ती जगिनी



जगिनी मम ग्रामे मेला भविष्यति इति आशासमाना आसीत् । तस्यै अयसः चकासमानानि पात्राणि चित्रितप्लास्टिक-द्रोण्यः गाढवर्णैः बहुपुष्पचित्रितानि वस्त्राणि कुञ्चिकया भ्रमणशीलानि उत्तमानि क्रीडनकानि च रोचन्ते स्म । एतेषां वस्तूनां विक्रेतारः वणिजः नगरेभ्यः बसयानैः ट्रकयानैः च तत्र आयान्ति स्म अपि च रात्रौ अवशिष्टानि स्ववस्तूनि पुटीकृत्य नयन्ति स्म । जगिनी आश्चर्यचकिता आसीत् यत् किमर्थं ते जनाः इत्थं भ्रमन्तः भवन्ति ? तस्याः अम्बा उक्तवती यत् ते वणिजः आसन् । एते वणिजः यत्र एतानि वस्तूनि निर्मीयन्ते ततः क्रीत्वा मेलासु एतानि विक्रीणते ।

## वाणिज्यस्य वणिजां च विषये अवबोधः

नवमे अध्याये भवती उत्तरस्यां दिशि निर्मीयमाणानां कृष्णलेपयुक्तानां पात्राणां विषये पठितवती अस्ति । एतानि सुन्दराणि पात्राणि, विशेषतया अत्रत्याः कंशाः, स्थालिकाः च एतस्य उपमहाद्वीपस्य अनेकेभ्यः पुरास्थलेभ्यः लब्धानि सन्ति । अयं प्रश्नः उदेति यत् एतादृशेषु पुरास्थलेषु एतानि भाजनानि कथं गतानि स्युः ? इत्थम् ऊह्यते यत् यत्र एतेषां निर्माणं भवति स्म तस्मात् कारणात् वणिजः एतानि पात्राणि ततः स्वीकृत्य विभिन्नेषु स्थानेषु विक्रीणन्ते स्म ।

दक्षिणभारतं प्रायः सुवर्णस्य उपस्कराणां विशेषतया कृष्णमरीचिकायाः बहुमूल्यपाषाणानां च कृते प्रसिद्धम् आसीत् । कृष्णमरीचिकायाः रोमनसाम्राज्ये एतावती याञ्चा आसीत् यत् तत्रत्याः जनाः तस्याः नाम कृष्णसुवर्णम् इति कृतवन्तः । एतानि वस्तूनि वणिजः समुद्रीययानैः राजमार्गैः च रोमदेशं प्रापयन्ति स्म । दक्षिणभारते एवंविधाः अनेकाः रोमनमुद्राः प्राप्ताः सन्ति ताभिः मुद्राभिः ऊह्यते यत् तेषु दिनेषु रोमदेशेन सह भारतस्य वाणिज्यव्यवहारः अतीव सम्यक् आसीत् ।

किं भवती वक्तुं शक्नोति यत् एताः मुद्राः भारतं कथं प्राप्ताः स्युः ? तत्र च कारणं किं स्यात् ?

वाणिज्य-सम्बद्धा काचित् कविता

वाणिज्यस्य प्रमाणानि वयं सङ्गमकविताभ्यः अपि प्राप्नुमः ।

अधोलिखितायां कवितायां पूर्वस्मिन् समुद्रतटे स्थिते पुहारपत्तने आनीतसामग्र्याः वर्णनम् उपलभ्यते ।

"समुद्रीययानैः आनीताः द्रुतगामिनः अश्वाः,
वाहनेषु कृष्णमरीचिकायाः चयाः,
हिमालयतः प्राप्तानि रत्नानि सुवर्णं च ।
दक्षिणस्य उपत्यकाभ्यः चन्दनस्य काष्ठानि,
दक्षिणसागरस्य मौक्तिकानि
पूर्वसागरस्य प्रवालाः
गङ्गायाः कावेर्याः च तटवर्तिनि सस्यानि
श्रीलङ्कातः आनीतानि खाद्यान्नानि
म्यांमारे निर्मितानि मृण्मयभाजनानि दुर्लभानि बहुमूल्यानि आयातितानि वस्तूनि च

कवितायाम् उल्लिखितानां वस्तूनां सूचीं करोतु । किं भवती बोधयितुं शक्नोति यत् एतेषां वस्तूनाम् उपयोगः किमर्थं क्रियते स्म ?

वणिजाः अनेकान् सामुद्रमार्गान् अन्विष्टवन्तः । केचन वणिजः काँश्चन समुद्रतटवर्तिनः मार्गान् अनुसरन्ति स्म अपि च केचन अरबसागरस्य बंगालस्य च अखातं पारं कुर्वन्ति स्म । नाविकाः ऋतु-प्रेरित-वात-साहाय्येन शीघ्रां स्वयात्रां शीघ्रं समापयन्ति स्म । ते नाविकाः अफ्रीकायाः अरबस्य च पूर्वीतटेन एतस्य उपमहाद्वीपस्य पश्चिमतटं प्राप्तुम् इच्छन्ति स्म । तस्मात् कारणात् ते नाविकाः दक्षिणपश्चिमर्तुवातसाहाय्येन आगन्तुम् इच्छन्ति स्म । एतासां सुदूरदेश-यात्राणां कृते दृढजलपोतानां निर्माणं क्रियते स्म ।

## समुद्रवर्त्तिनि राज्यानि

एतस्य उपमहाद्वीपस्य दक्षिणभागः कश्चन बृहान् समुद्रीतटवर्त्ती प्रदेशः अस्ति । एतस्मिन् बहवः पर्वताः प्रस्तराः नदीक्षेत्राणि च सन्ति । नदीनां समतलक्षेत्रेषु कावेरीनद्याः समीपस्थं क्षेत्रं बहु उर्वरतमम् अस्ति । समतलक्षेत्राणाम् एवञ्च तटवर्त्तिक्षेत्राणां स्वामिनः नृपाः च कालक्रमेण शनैः शनैः सम्पन्नाः शक्तिमन्तः च अभवन् । सङ्गमकवितासु 'मूवेन्दर' इत्यस्य चर्चा उपलभ्यते । एषः कश्चित् तमिलशब्दः अस्ति यस्य अर्थः "तीनमुखिया" इति अर्थात् ''त्रिमुख्याः'' इति भवति । एषः कश्चित् तमिलशब्दः अस्ति अस्य अर्थः भवति "तीनमुखिया" इति अर्थात् त्रिमुख्याः इति । एतस्य प्रयोगः त्रयाणां शासकपरिवाराणां प्रमुखाणां कृते कृतः अस्ति । एते चोल-चेर-पाण्ड्याः च आसन् । (मानचित्रम्- ७,पृष्ठम् - ११३) एते प्रायः २३००वर्षेभ्यः पूर्वं दक्षिणभारते बहुशक्तिशालिनः इति मन्यन्ते स्म ।

एतेषां त्रयाणां प्रमुखाणां स्वस्य द्वे सत्ताकेन्द्रे आस्ताम् । एतयोः एकः तटभागे अपरः च अन्तर्भागे आसीत् । एतादृशेषु षट्सु केन्द्रेषु द्वे अतीव महत्त्वपूर्णे केन्द्रे आस्ताम् । प्रथमः चोलानां पत्तनम् 'पुहार' अथवा 'कावेरीपट्टिनम्' इति आसीत् अपरं च पाण्ड्यानां राजधानी 'मदुरै' इति आसीत् ।

एते प्रमुखजनाः जनेभ्यः नियमितकरग्रहणस्य स्थाने उपहाराणां याचनां कुर्वन्ति स्म । कदाचित् एते सैनिकाभियानानि अपि सञ्चालयन्ति स्म । प्रमुखजनाः पार्श्वस्थेभ्यः स्थानेभ्यः राजस्वं गृहीत्वा आनयन्ति स्म । एतस्मात् राजस्वात् किञ्चित् धनं ते स्वस्य पार्श्वे स्थापयन्ति स्म अवशिष्टं धनं च स्वसमर्थकेषु सम्बन्धिषु सैनिकेषु कविषु च वण्टयन्ति स्म । अनेकैः सङ्गमकालिकैः कविभिः तेषां प्रमुखाणां प्रशंसायां कविताः लिखिताः, ये तेभ्यः कविभ्यः सम्मानरूपाणि बहुमूल्यरत्नानि सुवर्णम् अश्वान् हस्तीनि रथान् सुन्दरवस्त्राणि च यच्छन्ति स्म ।

एतेषां चोलादिनृपाणां प्रायः २००वर्षाणां पश्चात् पश्चिमभारते सातवाहननामकस्य राजवंशस्य प्रभावः वर्धितः । सातवाहनानां प्रमुखतमः राजा गौतम्याः पुत्रः सातकर्णी आसीत् । एतत् तस्य मात्रा गौतमीबलश्रिया दत्तदानस्य अभिलेखात् ज्ञायते । सः अन्ये च सातवाहनशासकाः दक्षिणापथस्य स्वामिनः उच्यन्ते स्म । दक्षिणापथस्य शाब्दिकः अर्थः दक्षिणं प्रति गमनशीलः मार्गः भवति । सम्पूर्णस्य दक्षिणक्षेत्रस्य कृते अपि इदम् एव नाम प्रचलितम् आसीत् । श्रीसातकर्णी पूर्वपश्चिमदक्षिणतटेषु स्वसेनाः प्रेषितवान् ।

किं भवती ज्ञापयितुं शक्नोति यत् श्रीसातकर्णी तटेषु नियन्त्रणं किमर्थम् इच्छति स्म ?

## रेशम-मार्गस्य कथा

कौशेयवस्त्राणि बहुमूल्यत्वात् कान्तिमद्वर्णत्वात् भासत्वात् स्निग्धत्वात् कोमलस्पर्शत्वात् अधिकांशसमाजे बहुमूल्यानि इति मन्यन्ते । कौशेयवस्त्रनिर्माणस्य प्रक्रिया अपि जटिला अस्ति । कौशेयस्य कीटानां सुरक्षाकवचेभ्यः असंशोधितकौशेयं निष्कास्य तन्तुकर्तनं भवति पुनश्च तेन वस्त्रं वयते । कौशेयनिर्माणाभियान्त्रिकस्य आविष्कारः आदौ चीने प्रायः ७०००वर्षेभ्यः पूर्वम् अभवत् । चीनदेशः सहस्राधिकानि वर्षाणि यावत् विश्वस्य अन्यान् देशान् कौशेयनिर्माणप्रविधिं न अज्ञापयत् । परन्तु पद्भ्याम् अश्वैः उष्ट्रैः वा केचन जनाः दूरदेशान् गच्छन्ति स्म अपि च आत्मना सह कौशेयवस्त्राणि अपि नयन्ति स्म । येन मार्गेण एते जनाः यात्रां कुर्वन्ति स्म सः रेशममार्गः इति नाम्ना विख्यातः जातः ।

साञ्चीस्तूपस्य किमपि मूर्तिचित्रम् अत्र वृक्षं तस्य अधस्तनं रिक्तम् आसनं च पश्यतु मूर्तिकारैः इदं बोधयितुं इयं मूर्तिः खनित्वा विलिख्य वा रचिता यत् एतां मूर्तिं दृष्ट्वा जनाः बुद्धस्य ज्ञानप्राप्तेः विषये अवगच्छेयुः यत् एतस्य वृक्षस्य अधः उपविश्य ध्यायन् एव बुद्धः ज्ञानं प्राप्तवान्।

कदाचित् चीनशासकाः ईरानस्य पश्चिमैशियायाः च शासकानां कृते उपहाररूपेण दुकूलानि प्रेषयन्ति स्म । इतः कौशेयवस्त्राणां विषये संज्ञानम् इतोऽपि पश्चिमे प्रसृतम् । प्रायः २००० वर्षेभ्यः पूर्वं रोमदेशस्य शासकेषु धनाढ्येषु च वेषभूषारूपेण कौशेयवस्त्रधारणस्य प्रचलनं जातम्। एतेषां मूल्यं बहु अधिकं भवति स्म। एतेषां मूल्यं बहु अधिकं भवति स्म यतो हि चीनदेशात् आनयने दुर्गमपर्वतमार्गैः मरूभूमिमार्गैः च गमनं करणीयं भवति स्म। इदम् एव न मार्गस्य पार्श्वक्षेत्रस्थाः जनाः वणिग्भ्यः यात्राशुल्कं च याचन्ते स्म।

मानचित्रं 6 (पृष्ठसंख्या ८४-८५) इति पश्यतु। अत्र सिल्करूट् तथा तस्य शाखाः प्रदर्शिताः सन्ति । केचन शासकाः एतस्य महत्सु भागेषु नियन्त्रणं कर्तुं वाञ्छन्ति स्म । यतो हि अस्मिन् मार्गे यात्रां कुर्वद्भ्यः वणिग्भ्यः ते शुल्कोपहारमाध्यमेन लाभं प्राप्नुवन्ति स्म। एतदर्थं ते शासकाः स्वराज्ये गमनकाले दस्यूनाम् आक्रमणेभ्यः एतान् वणिजः रक्षन्ति स्म।

कौशयमार्गेषु येषां शासकानां नियन्त्रणम् आसीत् तेषु प्रसिद्धतमाः शासकाः कुषाणाः आसन्। प्रायः २०००वर्षेभ्यः पूर्वं मध्यैशियायां पश्चिमोत्तरभारते च एतेषां शासनम् आसीत्। पेशावरः मथुरा च एतेषां द्वे मुख्यशक्तिशालिनी केन्द्रे आस्ताम्। तक्षशिला अपि एतेषां राज्यस्य एव भागः आसीत् । एतेषां शासनकाले एव कौशयमार्गस्य काचित् शाखा मध्यैशिया भूत्वा सिन्धुनदीमुखस्य मुख्यपत्तनानि यावत् विस्तृता स्म। जलपोतैः इतः कौशेयपटः पश्चिमस्थे रोमनसाम्राज्ये प्राप्यते स्म। एतस्मिन् उपमहाद्वीपे सर्वप्रथमं सुवर्णनिष्कप्रकाशयितृषु शासकेषु कुषाणाः आसन्।



सिल्कमार्गे वाहनानाम् उपयोगः किमर्थं कठिनं स्यात्।

चीनतः समुद्रमार्गेण अपि कौशेयस्य निर्यातः भवति स्म। एतस्य षष्ठे मानचित्रे (८४-८५ इति पृष्ठयोः) अन्वेषणं करोतु । समुद्रमार्गेण कौशेयपटं प्रापयितुं कानि सौविध्यानि कानि च असौविध्यानि स्युः।

### बौद्धधर्मस्य प्रचारः

कुषाणानां प्रसिद्धतमः शासकः कनिष्कः आसीत्। प्रायः १९०० वर्षेभ्यः पूर्वं तस्य शासनम् आसीत्। सः कस्याश्चित् बौद्धपरिषदः सङ्घटनम् कृतवान् यत्र सङ्घीभूय विद्वान्सः महत्त्वपूर्णविषयेषु चिन्तनं वा कुर्वन्ति स्म। बुद्धस्य जीवनचरित्रस्य लेखकः अश्वघोषः कनिष्कस्य राजसभायाम् आसीत्। अश्वघोषः अन्ये च बौद्धविद्वांसः अधुना संस्कृतेन लेखितुम् आरब्धवन्तः आसन्।

एतस्मिन् काले बौद्धधर्मस्य महायान इति कस्याश्चित् नूतनधारायाः विकासः अभवत् । एतस्याः धारायाः मुख्यं विशेषताद्वयम् आसीत् । आदौ मूर्तिषु बुद्धस्य उपस्थितिः केवलं कैश्चित् सङ्केतैः दर्श्यते स्म । उदाहरणरूपेण तैः बुद्धस्य निर्माणप्राप्तिः कस्मिंश्चित् अश्वत्थवृक्षस्य मूर्तिना दर्श्यते स्म परन्तु अधुना बुद्धस्य प्रतिमानां निर्माणम् आरब्धम् । एतासु अधिकानां निर्माणं मथुरायाम् अपि च कासाञ्चिच्च निर्माणं तक्षशिलायाम् आरब्धाः ।

अपरं परिवर्तनं बोधिसत्त्वे आस्थाम् अभिलक्ष्य आगतम् । बोधिसत्त्वाः ते उच्यन्ते ये ज्ञानस्य प्राप्तेः पश्चात् एकान्ते वसन्तः ध्यानं साधनां च कर्तुं शक्नुवन्ति स्म । परन्तु एतत् कर्म अकृत्वा ते जनशिक्षणस्य साहाय्यस्य च कार्ये रुचिं स्वीकृतवन्तः अतः सांसारिकपरिवेशे एव ते स्थातुं निश्चितवन्तः । शनैः शनैः बोधिसत्त्वस्य पूजा अतीव लोकप्रिया अभवत् । अनेन प्रकारेण सम्पूर्णमध्यैशियां चीनदेशम् अपि च तदनन्तरं कोरियां जापानदेशं च यावत् विस्तारं प्राप्तवती ।

बौद्धधर्मस्य प्रचारः पश्चिमभारते दक्षिणभारते च अभवत् यत्र च बौद्धभिक्षूणां निवासाय पर्वतेषु अनेकाः गुहाः खनिताः निर्मिताः ।

*वामतः मथुरायां निर्मितबुद्धस्य कस्याश्चित् प्रतिमायाः चित्रम् ।*

*दक्षिणतः – तक्षशिलायां निर्मितायाः बुद्धस्य प्रतिमायाः किञ्चन चित्रम् ।*

*एते चित्रे दृष्ट्वा वदन्तु यत् एतयोः मध्ये काः काः समानताः काः काः असमानताः च सन्ति ?*





एतासु काश्चन गुहाः नृपाणां राजमहिषीणां च आदेशानुसारं तथा च काश्चन गुहाः वणिग्भिः कृषकैः च निर्मापिताः सन्ति । एतासु अधिकाः गुहाः पश्चिमघाटस्य दुर्गमपत्तनानां (गिरिद्वाराणाम्) समीपे निर्मिताः आसन् । दक्कनस्य नगराणि तटानां च समृद्धपोतस्थानकानि च योजयितुं ये राजमार्गाः आसन् ते अपि एतानि पत्तनानि भूत्वा एव निर्गच्छन्ति स्म । इत्थं प्रतिभाति यत् यात्राशालिनः वणिजः एतासु गुहायुक्तमठेषु विश्रान्तुं तिष्ठन्ति स्म ।

बौद्धधर्मः दक्षिणपूर्वे श्रीलंका-म्यामांर-थाईलैण्ड-इण्डोनेशियासहितेन दक्षिणपूर्वेशियायाः च अन्येषु भागेषु अपि प्रसृतः आसीत् । थेरवादनामक-बौद्धधर्मस्य आरम्भिकरूपम् एतेषु क्षेत्रेषु आधिक्येन प्रचलितम् आसीत् ।

शततमं पृष्ठम् एकवारं पुनः पठतु । किं भवती ज्ञापयितुं शक्नोति यत् बौद्धधर्मः एतेषु क्षेत्रेषु कथं विस्तारं प्राप्तवान् स्यात् ?

### तीर्थयात्रिणां जिज्ञासा

व्यापारिणः समूहेषु तथा च समुद्रयानेषु दूरदेशान् यावत् गच्छन्ति स्म । बहवः तीर्थयात्रिणः अपि तैः सह यात्रार्थं गच्छन्ति स्म ।

**तीर्थयात्रिणः**

तीर्थयात्रिणः ते स्त्रीपुरुषाः भवन्ति, ये प्रार्थनायाः कृते पवित्रस्थानानां यात्रां कुर्वन्ति ।



*कार्ले इत्यस्य गुहा, महाराष्ट्रम्*

अनेन एव प्रकारेण भारतस्य यात्रायाः कृते आगतः चीनदेशीयः बौद्धयात्री फा-शिएन इति बहुप्रसिद्धः अस्ति । सः प्रायः १६०० वर्षेभ्यः पूर्वम् आगतवान् । श्वैनत्सांगः १४०० वर्षेभ्यः पूर्वं भारतम् आगतवान् तस्मात् प्रायः ५० वर्षाणां पश्चात् इत्सिंगः भारतम् आगतवान् । ते सर्वे बुद्धसम्बद्धस्थानानि प्रसिद्धमठानि च द्रष्टुं भारतम् आगतवन्तः आसन् ।

एतेषु प्रत्येकं तीर्थयात्री स्वयात्रायाः वृत्तान्तं लिखितवान् । एतासु यात्रासु बहूनि वर्षाणि लगन्ति स्म । ते यान् देशान् मठान् च दृष्टवन्तः तेषां विषये लिखितवन्तः अपि च तेषां पुस्तकानां विषये अपि उल्लिखितवन्तः यानि ते आत्मना सह नीतवन्तः आसन् ।

**फा-शिएनः चीनदेशं प्रति कथं प्रत्यागतवान्**

फाशिएनः स्वगृहं चीनदेशं प्रति गन्तुं स्वयात्रां बङ्गालतः आरब्धवान् । सः वणिजां किमपि जलपोतम् आरुढवान् । प्रायः ते दिनद्वयं यावत् एव चलितवन्तः आसन् यत् सहसा ते समुद्रीये झञ्झावाते आवृताः जाताः । वणिजः जलपोतस्य रक्षणाय तस्मिन् आरूढवस्तूनि तस्मात् अधः क्षेप्तुम् आरब्धवन्तः येन जलपोतः कथञ्चित् अल्पभारयुक्तः स्यात् । फाशिएनः अपि स्ववस्तूनि तत्र क्षिप्तवान् परन्तु सः आत्मना सङ्कलितपाण्डुलिपीः बुद्धस्य च मूर्तीः न क्षिप्तवान् याः सः भारते स्वयात्रायाः काले संङ्कलितवान् आसीत् । अन्ततः त्रयोदशानां दिनानां पश्चात् समुद्रीयः झञ्झावातः विरामं गतः । सः यात्री समुद्रस्य वर्णनम् इत्थं कृतवान् अस्ति ।

समुद्रः असीमः अस्ति – सूर्यचन्द्रताराकाणां च गतिम् अदृष्ट्वा इदं ज्ञानम् असम्भवम् अस्ति यत् पूर्वा दिक् अथवा पश्चिमा दिक् कुत्र अस्ति अर्थात् दिशाज्ञानं जटिलं भवति । यदि वर्षाकालः भवेत् अथवा तमः स्यात् तर्हि जलपोतः वायोः प्रवाहे एव नेतव्यः तदतिरिच्य अन्यः कोऽपि उपायः तत्र न भवति ।

सः जावां नवतेः दिनेभ्यः अपि अधिकेन समयेन प्राप्तवान् । तत्र सः पञ्चमासान् यावत् अतिष्ठत् । तदनन्तरं सः अपरं वणिग्यानम् आरुह्य चीनं प्राप्तवान् ।

षष्ठे मानचित्रे (पृष्ठम् 84-85) फाशिएनद्वारा निर्धारितमार्गम् अन्विष्यतु ।

ज्ञापयतु यत् फा-शिएनः स्वपाण्डुलिपीः मूर्तीः च किमर्थं न क्षेप्तुम् इच्छति स्म ।

श्वैनः त्सांगः भूमार्गेण चीनं प्रतिगतवान् । सः उत्तरपश्चिममध्यैशियायाः भूत्वा तत्र गतवान् । सः सुवर्णमयीं रजतमयीं चन्दनकाष्ठमयीं च बुद्धस्य प्रतिमाः तथा च षट्शताधिकाः पाण्डुलिपीः एकत्रीकृतवान् आसीत् । याः सः विंशतिघोटकेषु आरोहय्य नीतवान् । परन्तु तासु ५०पाण्डुलिपयः तदा लुप्ताः यदा सः सिन्धुनदीं पारं कुर्वन् आसीत् तदा तस्य नौः जले अधोमुखी जाता । स्वजीवनस्य अवशिष्टं कालं सः अवशिष्टपाण्डुलिपीनां संस्कृतानुवादकार्ये नियोजितवान् ।

**नालन्दा – शिक्षायाः कश्चित् विशिष्टं केन्द्रम्**

श्वैनत्सांगः तथा च अन्ये तीर्थयात्रिणः तस्मिन् कालस्य प्रसिद्धतमे बौद्धविद्याकेन्द्रे नालन्दायां बिहारे अधीतवन्तः । सः नालन्दायाः विषये अनेन प्रकारेण लिखितवान् ।

अत्रत्याः शिक्षकाः योग्यतादृष्ट्या बुद्ध्या च अग्रेसराः सन्ति । बुद्धस्य उपदेशानां ते सम्पूर्णतया सत्यनिष्ठया च पालनं कुर्वन्ति । मठस्य नियमाः बहुकठोराः सन्ति ये सर्वैः पालनीयाः भवन्ति । आदिनं तादृशाः वादाः विवादाः एव चलन्ति येषु युवजनाः वृद्धाः च परस्परं साहाय्यं कुर्वन्ति । विभिन्नेभ्यः नगरेभ्यः विद्वांसः अत्र स्वशङ्काः समाधातुम् आयान्ति । नूतनागन्तुकेभ्यः पूर्वं द्वारपालाः एव कठिनप्रश्नान् पृच्छन्ति । ते अन्तः प्रवेष्टुं तदा एव अनुमताः भवन्ति यदा ते द्वारपालस्य प्रश्नानां समीचीनम् उत्तरं दातुं पारयन्ति । दशसु सप्त अष्ट जनाः समीचीनानि उत्तराणि न दातुं प्रभवन्ति ।

श्वैनत्सांगः नालन्दायां किमर्थं पिपठिषति स्म, कारणं ज्ञापयतु ?

## भक्तेः आरम्भः

वराहस्य रूपेण विष्णुः । मध्यप्रदेशस्य एरणस्य इयं शोभनप्रतिमा विष्णोः वराहावतारस्य अस्ति । पुराणानाम् अनुसारं जलमग्नां पृथिवीं हिरण्याक्षात् रक्षितुं विष्णुः वराहावतारं धृतवान् आसीत् । अत्र पृथिवी कस्याश्चित् महिलायाः रूपेण दर्शिता अस्ति ।



एतेषु दिनेषु देवीनां देवानां च पूजनस्य अपि प्रचलनम् आरब्धम् । अनन्तरकाले हिन्दूधर्मस्य एतत् प्रमुखं परिचयचिह्नम् अभूत् । एतेषु शिवविष्णुदुर्गासदृशाः देव्यः देवाः च सम्मिलिताः सन्ति ।
एतेषां देवानां-देवीनां च अर्चनं भक्तिभावेन क्रियते स्म । भक्तिः तस्मिन् काले पर्याप्तलोकपरम्परा जाता आसीत् । काम् अपि देवतां प्रति श्रद्धा एव भक्तिः इति उच्यते । भक्तेः मार्गः सर्वेषां कृते उद्घटितः आसीत् कामं सः धनी स्यात् अथवा निर्धनः स्यात् सः उच्चकुलीनः स्यात् अथवा निम्नकुले जातः स्यात् सा स्त्री स्यात् अथवा कश्चित् पुरुषः वा स्यात् ।

भक्तेः मार्गस्य चर्चा हिन्दूनां पवित्रग्रन्थे भगवद्गीतायां कृता अस्ति । भगवद्गीता महाभारतस्य कश्चित् भागः अस्ति । द्वादशाध्याये पश्यतु । एतस्यां भगवान् कृष्णः स्वभक्तं मित्रं अर्जुनम् सर्वान् धर्मान्परित्यज्य तस्य शरणं गन्तुम् उपदिशति । यतोहि कृष्णः एव अर्जुनं सर्वपापेभ्यः मोक्तुं शक्नोति । पूजायाः एतत् रूपं शनैः शनैः देशस्य विभिन्नभागेषु प्रसृतम् ।

भक्तिमार्गसाधकाः कपटतापूर्णाचरणं परित्यज्य ईश्वरं प्रति लग्नशीलतया वैयक्तिकरूपेण च पूजायां बलाघातं कुर्वन्ति स्म ।

भक्तिमार्गसाधकानाम् इयं मान्यता अस्ति यत् यदि ते स्वाराध्यदेव्याः देवस्य वा अनन्यमनस्काः भूत्वा पूजां कुर्युः तर्हि सा देवी अथवा देवः तेभ्यः तस्मिन् एव स्वरूपे दर्शनं दास्यति यस्मिन् स्वरूपे भक्तः दर्शनम् इच्छति । अतः आराध्यदेवी देवः वा मानवस्य रूपेण अपि भवितुम् अर्हति अथवा पुनः सिंहस्य वृक्षस्य वा अन्येन केनापि रूपेण भवितुम् अर्हति । यथा यथा एनं विचारं समाजः अङ्गीकृतवान् कलाकाराः शिल्पिनः वा देवीदेवानां उत्कृष्टात्युत्कृष्टाः शोभनाः प्रतिमाः निर्मातुं सज्जीकर्तुम् च आरब्धवन्तः ।

### भक्तिः

भक्तिः इति शब्दः भज्-धातोः निष्पन्नः अस्ति यस्य अर्थः विभाजनम् अथवा सेवनं भवति । एतस्य अर्थः अयम् अस्ति यत् भक्तिः भगवान् भक्तस्य च मध्ये परस्परं कश्चित् अन्तरङ्गसम्बन्धः अस्ति । भक्तिः भगवन्तं प्रति नमनम् श्रद्धाभावः वा अस्ति । भगवतः अर्थः अयम् अपि अस्ति यत् यः स्वैश्वर्यं सुखं च भक्तेषु विभाजयति । अर्थात् भक्तः स्वभगवतः अथवा देव्यः देवतायाः च ऐश्वर्यस्य सुखस्य वा अधिकारी भवति ।

### केनचित् भक्तेन लिखिता कविता

अधिकांशतः भक्तिसाहित्यानि अस्मान् एतत् एव बोधयन्ति यत् धनेन ऐश्वर्येण उच्चपदेन वा कदाचित् अपि ईश्वरेण सह आत्मीयभावः न स्थापयितुं शक्यते । प्रायः १४००वर्षेभ्यः पूर्वं शिवभक्ताप्पारद्वारा तमिलभाषया लिखितकवितायाः कश्चित् अंशः अत्र अस्ति । अप्पारः कश्चित् बेल्लालः(अध्यायः -९) आसीत् ।

नष्टप्रायः अङ्गयुक्तः कुष्ठरोगी
ब्राह्मणानां दृष्टौ निम्नजातीयः जनः
अवकरादिकं सङ्गृह्य जीविकाचालकः मनुष्यः,
यदि एते जनाः अपि गङ्गाधरस्य शिवस्य दासाः भवेयुः तर्हि अहं तान् आराधयिष्यामि ।
यतो हि ते मम ईश्वरसमाः सन्ति ।

कविः सामाजिकप्रतिष्ठा-भक्त्योः काम् अधिकं महत्त्वं ददाति ?

देवीदेवानां च विशेषरूपेण सम्माननं भवति स्म । अतः विशिष्टेषु स्थानेषु एव एतासां मूर्तयः स्थाप्यन्ते स्म । एतानि स्थानानि एव मन्दिराणि इति उच्यन्ते । द्वादशाध्याये भवती एतेषां मन्दिराणां विषये पठिष्यति ।

भक्तिपरम्परायां चित्रकलायाः शिल्पकलायाः स्थाप्यकलायाः च माध्यमेन अभिव्यक्तेः प्रेरणा प्रदत्ता अस्ति ।

### हिन्दुः

हिन्दु इति शब्दः इण्डियाशब्दस्य इव सिन्धोः अथवा इण्डसतः निष्पन्नः अस्ति । अयं शब्दः अरबदेशीयैः ईरानदेशीयैः च तेषां जनानां कृते उपयुज्यते स्म, ये सिन्धुनद्याः पूर्वस्मिन् भागे निवसन्ति स्म । अयम् एव शब्दः तेषां धार्मिकविश्वासानां परम्पराणां च कृते प्रयुज्यते स्म ।

### अन्यत्र

प्रायः २०००वर्षेभ्यः पूर्वं पश्चिमैशियायां ईसाईधर्मस्य प्रादुर्भावः अभवत् । ईसामसीहस्य जन्म बेथलेहमस्थले अभवत्, यः तस्मिन् काले रोमनसाम्राज्यस्य भागः आसीत् । ईसामसीहः आत्मानम् अस्य संसारस्य उद्धारकम् इति उक्तवान् । सः उपदिष्टवान् यत् अस्माभिः अन्येषु स्नेहः करणीयः अपि च अपरेषु विश्वासः करणीयः यथा प्रत्येकं मनुष्यः अन्येभ्यः अपि स्नेहस्य विश्वासस्य च अपेक्षां करोति ।

बाइबिलमध्ये ईसामसीहस्य उपदेशस्य वृत्तान्ताः लिखिताः सन्ति । अत्र ततः उद्धृतः कश्चित् अंशः अस्ति –

धन्याः ते जनाः ये धर्मस्य न्यायस्य च कृते क्षुधार्ताः तृषार्ताः च तिष्ठन्ति,<br>
तेषां कामनाः पूर्तिं गमिष्यन्ति ।<br>
ये दयालवः सन्ति, ते धन्याः सन्ति, यतो हि ते दयापात्राणि भविष्यन्ति ।<br>
धन्यास्ते जनाः ये हृदयेन पवित्राः सन्ति,<br>
यतो हि ते ईश्वरस्य दर्शनं कर्तुं शक्ष्यन्ति ।<br>
धन्यास्ते जनाः ये शान्तिं स्थापयन्ति,<br>
ते एव ईश्वरसन्ततयः इति ख्यातिं प्राप्स्यन्ति ।

ईसामसीहस्य उपदेशाः जनेभ्यः अरोचन्त, कालक्रमेण एते पश्चिमैशियायाम् अफ्रीकायां यूरोपे च प्रसरितवन्तः । ईसामसीहस्य मृत्योः शतं वर्षाणाम् आभ्यन्तरे एव भारतीयोपमहाद्वीपस्य पश्चिमतटे पूर्वम् एव ईसाईधर्मप्रचारकाः पश्चिमैशियातः आगतवन्तः ।

षष्ठं मानचित्रं (पृष्ठम् 84-85) पश्यतु अपि च तत्र अन्विष्यतु यत् केन मार्गेण ईसाईधर्मप्रचारकाः भारतम् आगतवन्तः स्युः ?

केरलस्य ईसाईजनाः सिरियायी ईसाईजनाः इति उच्यन्ते यतो हि सम्भवतः ते पश्चिमैशियातः आगतवन्तः आसन् ते विश्वस्य प्राचीनेषु ईसाईजनेषु अन्यतमाः सन्ति ।

### कल्पयतु

भवत्याः पार्श्वे काचित् पाण्डुलिपिः अस्ति यां कश्चित् चीनदेशीयः तीर्थयात्री आत्मना सह नेतुम् इच्छति । तेन सह स्ववार्तालापस्य वर्णनं करोतु ।

**उपयोगिशब्दः**

**वणिक्**<br>
मुवेन्दारः=शासकपरिवारत्रयम्<br>
मार्गः,<br>
कौशेयम्,<br>
कुषाणः<br>
महायानम्<br>
बोधिसत्त्वः<br>
थेरवादः<br>
तीर्थयात्री<br>
भक्तिः

## आगच्छन्तु स्मरणं कुर्मः



१. निम्नलिखितस्य उपयुक्तयुग्मान् रचयतु

| | |
|---|---|
| दक्षिणापथस्य स्वामिनः | बुद्धचरितम् |
| मुवेन्दारः | महायान-बौद्ध-धर्मः |
| अश्वघोषः | सातवाहनशासकः |
| बोधिसत्त्वः | चीनदेशीयः यात्री |
| श्वैनत्सांगः | चोलः चेरः पाण्ड्यः |

२. राजानः सिल्करूटस्य उपरि स्वस्य नियन्त्रणं किमर्थं स्थापयितुम् इच्छन्ति स्म ?

३. वाणिज्यस्य वणिक्मार्गाणां च विषये इतिहासकाराः केषां केषां साक्ष्याणाम् उपयोगं कुर्वन्ति ?

४. भक्तेः प्रमुखविशेषताः काः काः आसन् ?

## आगच्छन्तु चर्चां कुर्मः



५. चीनदेशीयाः तीर्थयात्रिणः भारतं किमर्थम् आगतवन्तः आसन् ? कारणं वदन्तु ।

६. साधारणजनानां भक्तिं प्रति आकर्षणस्य किं कारणं भवति ?

## आगच्छन्तु कृत्वा पश्याम



७. भवती विपणितः कानि कानि वस्तूनि क्रीणाति तेषां सूचीं निर्मातु । वदन्तु यत् भवती यस्मिन् नगरे अथवा ग्रामे निवसति तत्र कानि कानि वस्तूनि निर्मितानि आसन् अपि च कानि वस्तूनि वणिजः बहिष्ठात् आनीतवन्तः आसन् ?

८. अद्य भारते जनाः अनेकाः तीर्थयात्राः कुर्वन्ति । तासु कस्याश्चित् एकस्याः विषये जानातु तथा च संक्षिप्तं विवरणं यच्छतु । (सङ्केतः – तीर्थयात्रायां स्त्रीपुरुषबालेषु के गन्तुं शक्नुवन्ति ? अत्र कियान् कालः अपेक्षते ? जनाः कथं यात्रां कुर्वन्ति ? ते यात्राकाले आत्मना सह कानि कानि वस्तूनि नयन्ति ? तीर्थानि प्राप्य ते किं कुर्वन्ति ? किं ते ततः प्रत्यागमनकाले आत्मना सह किमपि आनयन्ति ?

इति दशमोऽध्यायः

### काश्चन महत्त्वपूर्णतिथयः

- कौशेयनिर्माणस्य कलायाः अन्वेषणम् (प्रायः ७००० वर्षेभ्यः पूर्वम्)
- चोलचेरपाण्ड्याः (प्रायः २३०० वर्षेभ्यः)
- रोमनसाम्राज्ये कौशेयस्य वर्धितयाचना(प्रायः २००० वर्षेभ्यः पूर्वम्)
- कुषाणशासकः कनिष्कः (प्रायः १९०० वर्षेभ्यः प्राक्)
- फा-शिएनस्य भारतं प्रति आगमनम् (प्रायः १६०० वर्षेभ्यः पूर्वम् ।
- श्वैनत्सांगस्य भारतयात्रा, अप्पारस्य शिवस्तुतिरचना (प्रायः १४०० वर्षेभ्यः पूर्वम्)